ॐ

शा

भं= सुर रा ... स्वामी= दशैभ्व ... तिर्थे

सह रां= मेघवर्ण= र

लक्ष्मी कान्तं= कमलनय

योगि भिध्यान गम्यं ... प

रमां गतिम् =१= स्थाने हृषीके

श तव प्रकीर्त्या= जगत्प्रहृष्य

त्यनुरज्यते च= रक्षांसि भी

तानि दिशो द्रवन्ति= सर्वेनम

स्यन्ति च सिद्ध संघाः॥१॥ सर्वे

ॐ ॐ ॐ ॐ ॐ ॐ ॐ

शान्ताकारं=भुजगशयनं=पद्मना
भं=सुरेशं=विश्वाधारं=गगन
सदृशं=मेघवर्ण=शुभाङ्ग
लक्ष्मीकान्तं=कमलनयन=
योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथं
रमां गतिम्=१= स्थाने हृषीके
श तव प्रकीर्त्या=जगत्प्रहृष्य
त्यनुरज्यते च=रक्षांसि भी
तानि दिशो द्रवन्ति=सर्वे नम
स्यन्ति च सिद्धसंघाः॥२॥ सर्व

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः
श्रीगुरूभ्योनमः॥अथसत्पश्लोकी
गिताप्रारंभ= ओमित्येकाक्ष
रंब्रम्ह=व्याहरन्मामनुस्मरन्=
यःप्रयातित्यजन्देहं=सयातिप
रमांगतिम्=१=स्थानेहृषीके
शतवप्रकीर्त्या=जगत्प्रहृष्य
त्यनुरज्यतेच=रक्षांसिभी
तानिदिशोद्रवन्ति=सर्वेनम
स्यन्तिचसिद्धसंघाः॥२॥सर्वे

तः पाणिपादं = तत्सर्वतोक्षिशिरो
मुखम् = सर्वतः श्रुतिमल्लोके =
सर्वमावृत्य तिष्ठति ॥३॥ कविं
पुराणमनुशासितार = मणोर
णीयांसमनुस्मरेद्यः ॥ सर्वस्य
धातारमचिन्त्यरूप = मादित्य
वर्णं तमसः परस्तात् ॥४॥ ऊर्ध्व
मूलमधश्शाखमश्वत्थं प्राहुर
व्ययम् ॥ छंदांसि यस्य पर्णा
नि यस्तं वेद स वेद वित् ॥५॥

सर्वस्य चाहं हृदि सन्निविष्टो=
मत्तः स्मृतिर्ज्ञानमपोहनं च॥ वे
दैश्च सर्वैरहमेव वेद्यो=वेदा
न्तकृद्वेदविदेव चाहम्॥६॥
मन्मना भव मद्भक्तो=मद्याजी
मां नमस्कुरु॥ मामेवैष्यसि
युक्त्वैवमात्मानं मत्परायणः७
इति श्रीमद्भगवद्गीता सूपनिषत्सु
ब्रम्हविद्यायां योगशास्त्रे श्री
कृष्णार्जुन संवादे सप्तश्लोकी

गीता समाप्ता=श्रीकृष्णार्पणमस्तुः
श्रीगणेशायनमः॥ अथ चतुःश्लो
कीभागवतप्रारंभः॥ श्रीभगवानु
वाच॥ ज्ञानंपरमगुह्यंमेयद्विज्ञा
नसमन्वितम्॥ सरहस्यंतदंगं
च गृहाणगदितंमया॥१॥ यावान
हं यथाभावोयद्रूपगुणकर्मकः॥
तथैवतत्वविज्ञानमस्तु ते
मदनूग्रहात्॥२॥ अहमेवा
समेवाग्रेनान्यद्यत्सदसत्पर

म् पश्चादहं यदेतच्चयोवशि
ष्येत सोस्म्यहम्॥३॥ ऋतेर्थं
यत्प्रतीयेत नप्रतीयेत चात्म
नि॥ तद्विद्यादात्मनोमायाय
थाभासोयथा तमः॥४॥यथा
महांति भूतानि भूतेषूच्चावच
ष्वनु॥ प्रविष्टान्य प्रविष्टानि
तथा तेषु न तेष्वहम्॥५॥ए
तावदेव जिज्ञास्यं तत्वजिज्ञा
सुनात्मनः॥अन्वयव्यतिरेका

भ्या यत्स्यात्सर्वत्र सर्वदा॥६॥
एतन्मतं ममातिष्ठ परमेण स
माधिना॥ भवान्कल्प विकल्पे
षु न विमुह्यति कर्हिचित्॥७॥ इ
ति श्री भागवते महापुराणेऽष्टा
दशसाहस्र्यां संहितायां वै
यासिक्यां द्वितीयस्कंधे भगव
द्ब्रह्म संवादे चतुःश्लोकी भा
गवतं समाप्तम्॥ ॥ ॥ ॥॥
अथ गेरूमंत्र = गैरिकाद्यत्समुद्भूते =

गैरिका बहिरुपीणीः त्वयारंजीत वस्त्रेण:यो
ग साफल्य मस्तुमे-

॥ अथ महावाक्य विवेकप्रकरणम् ५॥

॥ श्रीगणेशायनमः॥

येनेक्षते शृणो तीदं जिघ्रति व्याकरोतिच॥
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम्॥
चतुर्मुखेंद्र देवेषु मनुष्याश्वगवादिषु ॥
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्मामय्यपि॥२
परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि॥
बुद्धेः साक्षितया स्थित्वां स्फुरन्नहमितीर्यते॥
३

स्वतः पूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः॥
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्॥ ॥४॥
एकमेवाद्वितीयं सन्नामरूपविवर्जितम्॥
सृष्टेः पुराऽधुनाप्यस्य तादृक्त्वं तदितीर्यते॥५॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम्॥
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम्॥ ॥६॥
स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम्॥
अहंकारादिदेहान्तात्प्रत्यगात्मेति गीयते॥ ॥७॥
दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते॥
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम्॥ ॥८॥
॥ इति महावाक्यविवेकप्रकरणम् समाप्तः

पंच प्राणः कीम्-

१ प्राणायःस्वाहा-
२ अपानायस्वाहाः
३ व्यानाय स्वाहाः
४ ऊदानायस्वाहाः
५ समानाय स्वाहाः

पंच कोशाः के:

१ अन्नमय कोश
२ प्राणमय कोश
३ मनोमय कोश
४ बिज्ञान मय कोश
५ आनंद मय कोश

अवस्था तीन कीम्

१ जाग्रत
२ सुपन
३ सुसुपती

॥ संकर भगवान द्वादशाज्योतिलींग॥

१ सौराष्ट्रे सोमनाथंच—
२ श्रीशैले मल्लिकार्जुनम्—
३ उज्जैयिन्यां महाकाल—
४ मोंकार ममलेश्वरम्—
५ परयल्यां वैद्यनाथंच—
६ डाकिन्यां भीम शंकरम्—
७ सेतु बंधे तु रामेशं—
८ नागेशं दारूकावने—
९ वाराणस्यां तू विश्वेशं—
१० त्र्यंबकं गौतमीत्तटे—
११ हिमालये तू केदारं—
१२ घुसृणेशं शिवालये—

एतानी ज्योती लींगानी सायं प्रात पठेनर सप्तजन्म कृतं पापं स्मरणेन विनस्यती—

अथः सुरजनारायणकाः बारानामः

आदित्य = प्रथमंनाम १

दीवाकर = द्वितीयंतू २

भास्कर = त्रितीयं ३

प्रभाकर = चतूर्थंतूं ४

सहस्त्रासु = पंचमंतू ५

त्रिलोचनं = षष्ठं ६

हरिदस्वच्च = सत्पमं ७

विभावसु = अष्टमं ८

दिनकर = नवमं ९

द्वादसात्मकंम् = दसमं १०

त्रईमुर्ती = अेकादसं

सुर्य = द्वादसं

श्रीः॥

पञ्ची कृत पञ्च महाभूत तथा महाभूतों का कार्य यह सब विराट है। तथा आत्मा का स्थूल शरीर है जाग्रत अवस्था इन दोनु का अभीमानी विश्व ये तीनों अकार है॥ अपञ्ची कृत पञ्च महाभूत उनका कार्य इन का नाम हिरण्य गर्भ है स्वप्न अवस्था इन दोनों का अभी तेजस ये तिनों उकार है और आत्मा का अज्ञान सुसुप्ति अवस्था ये तिनों मकार है अकार उकार में उकार मकार में मकार ओंकार में ओंकार में हूं।

नवभुवं सप्तघोषं पैंच

तारं त्रिनासिकाम

जिह्वामेक दिनं प्रोक्तं

म्रियते मानवो ध्रुवम्

ॐनमशिवायशुभंकु
रु शुभंकुरु शिवाय
नमःॐ
ॐनमःशिवायँतत्पु
रुषाय विदमहे महा
देवायधिमहि तन्नो
रुद्रप्रचोदयात्
शिवायनम ॐ ॐ

॥श्री गणेशाय नमः ॐ ब्रह्मणे नमः

॥ १॥ चिरान्मग्नेनातः प्रकृ-
ति विषमे जन्म जलधौ-
मया पुण्यैर्लब्धौ गुरु-
स्मृत चिन्तामणिरहो--
यदीयाभिर्गौभिर्विधृ-
मधुराभिर्विगतिमिरे
स्वसम्पूर्णे यस्मान्निरवधि-
सुखे धामनि रमे ॥१॥ ॐ ॥
ॐ शान्ति २॥

ॐ अग्निरिति भस्म जल
मिति भस्म स्थल मिति
भस्म वायुरिति भस्म
व्योमेति भस्म सर्व
हँ हवा इदं भस्म

आत्मैवेदं सर्वं ब्रह्मैवेदं
सर्वं सर्वं खलु इदं ब्र
ह्म 3

मृत्युंजयाय रुद्राय
नीलकंठाय शंभवे
अमृतेशाय शर्वाय
महादेवाय ते नमः

ॐ प्राणाय स्वाहा ।। ॐ व्या
नाय स्वाहा ।। ॐ अपानाय
स्वाहा ॐ समानाय स्वाहा
ॐ उदानाय स्वाहा

ब्रह्मा बिष्णुश्चरुद्रश्च श्री
हुताशन एव च मंड
लान्यपतिष्ठंति तस्मात
कुर्बीत मंडलं

उत्तिष्ठोत्तिष्ठ भगवन्न
नारायण जगतपते
द्रष्टु पिमहाबिष्णो
प्रसीद पुरुषोत्तम

ॐ

ॐ बिस्वबिस्व १ बिस्व तैजश २ बिस्व
प्राज्ञ ३ विस्वतुरीय ४ तैजशबिस्व १
तैजशतैजश २ तैजश प्राज्ञ ३ तैजश
तुरीय ४ प्राज्ञबिस्व १ प्राज्ञतैजश २ प्राज्ञ
प्राज्ञ ३ प्राज्ञतुरीय ४ तुरीयबिस्व १ तुरी-
यतैजश २ तुरीय प्राज्ञ ३ तुरीयतुरीय ४
अकारे जाग्रत बिस्व १ उकारे जाग्रत
तैजसः २ मकारे जाग्रत प्राज्ञः ३ अर्ध
मात्रयाँ जाग्रत तुरीयः ४ बिन्दौ स्वप्नबि
स्वः १ नादे स्वप्नतैजस २ कलायाँ स्वप्न
प्राज्ञः ३ कलाऽतीते स्वप्नतुरीयः ४ शान्तौ
सुषुप्तबिस्वः १ शान्त्यतीते सुषुप्ततैजसः
२ उन्मन्यां सुषुप्तप्राज्ञो ३ मनोन्मयां
सुषुप्ततुरीयः ४ पुर्य्यांतुरीयबिस्वो १
मध्यमायां तुरीय तैजसः २ पश्यान्त्यां

अथ

॥ प्रणवार्थ बोधक पंची करणम् ॥

मूल

अथातः परमहंसानां समाधिविधिं व्याख्यास्यामः

ॐ सच्छब्दवाच्य मविद्या शबलं ब्रह्म

ब्रह्मणोऽव्यक्तम्

अव्यक्तान्महत्

महतो हङ्कारः

अहंकारात्पंचतन्मात्राणि

पंचतन्मात्रेभ्यः पंचमहाभूतानि

पंचमहाभूतेभ्यो खिलं जगत्

अर्थ

अब यहां परमहंसों की समाधिविधि कहेंगे

ॐ इस सत् शब्द से कहने योग्य अविद्या शबल ब्रह्म कहा जाता है ॥

ब्रह्म से अव्यक्त (प्रकृति अव्याकृत) अव्यक्त से महान् (सूक्ष्म हिरण्य गर्भ) महान् से अहंकार (सूक्ष्म परमाणु) अहंकार से ५ तन्मात्रा (सूक्ष्म भूत) पंचतन्मात्राओं से ५ महाभूत (पांच अस्थूल भूत) पांच महाभूतों से समस्त संसार (पैदा हुआ) प्रकट हुआ

...विद्धि

अर्धभागं चतुर्द्धा विभज्य
तदेषु योजिते पंचीकरणम्
मायारूप श्रुतिमध्या
रोपापवादाभ्यां
निष्प्रपंचं प्रपंच्यते

पंचीकृत पंचमहाभूतानि
तत्कार्यं च सर्वं विराड्
इत्युच्यते

एतत्स्थूलशरीरमात्मनः
इन्द्रियैरर्थोपलब्धि
जागरितम्
एतदुभयाभिमान्यात्मा
विश्व एतत्त्रयमकारः॥
अपंचीकृतपंचमहाभूतानि
पंचतन्मात्राणि
तत्कार्यंच पंच प्राणाः
दशेन्द्रियाणि मनो बुद्धिश्च

कर
आधे आधे के चार हिस्से कर
उन उनसे जोड़े तो पंचीकरण है
यही माया रूप दिखाया
अध्यारोप अपवाद से
निष्प्रपंच (प्रपंच रहित ब्रह्म
पर्यंचित हुवा है (प्रपंच रू
प दिखाता है

पंचीकरण किये हुये ५ महा
भूत और उनका कार्य ([illegible]
(समस्त ब्रह्माण्ड सब विराड्
ऐसा कहा जाता है

यह आपना स्थूलशरीर
(वही है) इन्द्रियों से विष
यों की साक्षात्कार प्रवृत्ति
अवस्था [illegible]
जाग्रत कहाती है
इन दुनो (जाग्रदवस्था-
स्थूल देह) का अभिमा
नी विश्व है। यही तीनो अ है
नहीं (स्पष्ट) पंचीकरण
हुवा जिनका ऐसे ५ महा
भूत पंचतन्मात्रा कहाते
है उनका कार्य ५ प्राण
१० इन्द्रिय १ मन और
१ बुद्धि ऐसे सब जोड़
कर

इतिसमस्तश्यलिंगं भौतिकं हिरण्यगर्भइत्युच्यते। एतत्सूक्ष्मशरीरमात्मनः करणेषु प संहृतेषु जागरित संस्कारजः प्रत्ययः सविषयः स्वप्नइत्युच्यते। तदुभयाभिमान्यात्मा तैजस एतत्रय मुकारः॥

शरीरद्वयकारण मात्माज्ञानं साभास मव्याकृत मित्युच्यते एतत्कारण शरीर मात्मनः॥

तच्च न सत् नासत् नापि सदसत् नभिन्नं नाभिन्नं नापि भिन्नाभिन्नं कुतश्चित् न निरवयवं नसावयवं नो भयम्॥ किन्तु केवल ब्रह्मात्मैकत्व ज्ञाना

न बाध्यम्...

७ तत्व का भौतिक यानी लिंग हिरण्यगर्भ कहा जाता है

यही अपना सूक्ष्मशरीर है॥ इन्द्रियों के उपसंहार (बाहर देने) होने पर जाग्रत के संस्कार सहित विषयों से युक्त अवस्था स्वप्न है॥

उन (सूक्ष्म स्वप्न) दूनो को अभिमानी तैजस है। यही तीनो उ हैं॥

इन-स्थूल सूक्ष्म-[illegible] दूनो शरीरों का कारण अपना अज्ञान आभास सहित अव्याकृत कहा जाता है यही अपना कारण शरीर है

वह कारण शरीर न सत न असत है न सत असत मिश्रित ही। न भिन्न न अभिन्न न भिन्न अभिन्न मिश्रित कहा॥ न अवयव रहित न अवयव सहित न इससे दूनो प्रकार का ही किन्तु केवल ब्रह्म आत्मा के एकी भाव होता हुवा अज्ञान स्वरूप है॥

[illegible]

...भोगात ।।

सर्वप्रकार ज्ञानोप
संहारे बुद्धेः कारणात्मा
नावस्थानं सुषुप्तिः
तदुभयाभिमान्यात्मा
प्राज्ञ एतत्त्रयं मकारः ।।
अकार उकारे उकारो
मकारे मकार ॐ कारे
ओंकारो ह्यस्येव
अहमात्मा साक्षी केवल
चिन्मात्रस्वरूपो
नाज्ञानं नापि तत्कार्यं
किंतु नित्य शुद्ध बुद्ध
मुक्त सत्य स्वभावं परमा
नन्दानाद्यनंताद्वयं
प्रत्यग्भूत चैतन्यं परंब्रह्मै
वाहमस्मीत्यभेदेना
वस्थानं समाधिः ।।

अज्ञान स्वरूप है ।।

सब प्रकार के ज्ञान के
न रहने पर बुद्धि का अपने
कारण में ठहर जाना
सुषुप्ति अवस्था है
सुषुप्ति-कारण इन दुनो को
अभिमानी आत्मा प्राज्ञ है
यही तीनो मकार है ।।
अकार उकार में उकार
मकार में मकार ओंकार में
ॐ कार अपना में लय
चिंतन विचार करना ।।
इसी आत्मा साक्षी केवल
चित्मात्र स्वरूप हैं ।।
न अज्ञान हैं न अज्ञान का
कार्य हैं किंतु नित्य शुद्ध
बुद्ध मुक्त सत्य स्वभाव
वाले परम आनंद अना-
दि अनंत अद्वय जीव
रूप से सर्वव्यापक पर
ब्रह्म ही हैं ।।
ऐसे अभेद ज्ञान से
ठहरना समाधि है ।।

ॐ

ॐ ब्रह्माद्याः सुराः सर्वे वशिष्ठाद्याः

महर्षयः ॥ मण्डले चोपतिष्ठन्ति

तस्मात्कुर्वीत मण्डलम्

तत्त्वमसि सामवेद

अहं ब्रह्मास्मि यजुर्वेद

प्रज्ञानं ब्रह्म ऋग्वेद

अयमात्मा ब्रह्म अथर्व

ॐ हारीतगीतायां

युधिष्ठिरउवाच॥ किंशीलः किं समाचारः
किं विद्यः किं परायणः॥ प्राप्नोति ब्रह्मणः
स्थानं यत्परं प्रकृतेर्ध्रुवम्॥१॥ भीष्मउवाच
मोक्षधर्मेषु निरतो लघ्वाहारो जितेंद्रियः॥
प्राप्नोति परमं स्थानं यत्परं प्रकृतेर्ध्रुवम्॥२
स्वगृहादभिनिःसृत्य लाभेऽलाभे समो मुनिः
॥ समुपोढेषु कामेषु निरपेक्षः परिव्रजेत
॥३॥ नचक्षुषा नमनसा नवाचा दूषयेदपि॥
नप्रत्यक्षं परोक्षं वा दूषणं व्याहरेत्क्वचित्॥४॥
नहिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत॥
नेदं जीवितमासाद्य वैरं कुर्वीत केनचित॥५॥
अतिवादांस्तितिक्षेत नाभिमन्येत कंचन॥
क्रोध्यमानः प्रियं ब्रूयादाक्रुष्टः कुशलं वदे-
त॥६॥ प्रदक्षिणं च सव्यं च ग्राममध्ये न चा-
चरेत॥ भैक्षचर्यामनापन्नो न गच्छेत्पूर्वकेति-
तः॥७॥ अवकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं
वदेत॥ मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्याद
कत्थनः॥८॥ विधूमे न्यस्तमुसले व्यंगारे
भुक्तवज्जने॥ अतीतपात्रसंचारे भिक्षां लि-
प्सेत वै मुनिः॥९॥ प्राणयात्रिकमात्रः स्या-
न्मात्रालाभेष्वनादृतः॥ अलाभे न विहन्येत
लाभश्चैनं न हर्षयेत॥१०॥

लाभश्चैवं न हर्षयेत ॥१०॥

लाभं साधारणं नेच्छेन्न भुंजीताभिपूजितः ॥
अभिपूजितलाभं हि जुगुप्सेतैव तादृशः ॥११
न चान्यदोषान्निंदेत न गुणानभिपूजयेत ॥
शय्यासने विविक्ते च नित्यमेवाभिपूजयेत ॥१२
शून्यागारं वृक्षमूलमरण्यमथवा गुहाम् ॥
अज्ञातचर्यां गत्वाऽन्यां ततोऽन्यत्रैव संविशे-
त ॥१३॥ अनुरोधविरोधाभ्यां समः स्यादच-
लो ध्रुवः ॥ सुकृतं दुष्कृतं चोभे नानुरुध्येत क-
र्मणा ॥१४॥ नित्यतृप्तः सुसंतुष्टः प्रसन्नवद-
नेंद्रियः विभीजिप्य परीभोनी बैराग्यं समु-
पाश्रितः ॥१५॥ अभ्यस्तं भौतिकं पश्यन्भूता-
नामागतिं गतिम् ॥ निस्पृहास्समदर्शी च
पक्वापक्वेन वर्तयन ॥ आत्मनायः प्रशांता-
त्मालध्वाहारी जितेंद्रियः ॥१६॥ वाचो वे-
गं मनसः क्रोधवेगं हिंसावेगमुदरोपस्थ
वेगम् ॥ एतान्वेगान्विषहेछैतपस्वी निंदा
चास्य हृदयं नोपहन्यात ॥१७ मध्यस्थ ए-
वतिष्ठेत प्रशंसानिंदयोः समः ॥ एतत्प-
वित्रं परमं परिव्राजक आश्रमे ॥१८॥
महात्मा सर्वतो दांतः सर्वत्रैवानपाश्रितः
॥ अपूर्वचारकः सौम्यो अनिकेतः समाहि-
तः ॥१९॥ वानप्रस्थगृहस्थाभ्यां न सं

मुच्येत कर्हिचित ॥ अज्ञातलिप्सां लि-
प्सेत न चैनं हर्षआविशेत् ॥२०॥ विजानतां
मोक्षएष श्रमः स्याद् विजानताम् ॥ मोक्ष
यानमिदं कृत्स्नं विदुषां हारितोऽब्रवीत् ॥२१॥
अभयं सर्वभूतेभ्यो दत्त्वा यः प्रव्रजेद् गृहा
त् ॥ लोकास्तेजोमया स्तस्य तथाऽनंत्या
य कल्पते ॥२२॥

इति श्रीमहाभारते शांतिपर्वणि मोक्ष
धर्मपर्वणि हारीतगीतायां अष्टसप्त
धिकद्विशततमोऽध्यायः ॥२७८॥

मौनं योगाशनं योग तितिक्षैका
न्तशीलता। निस्पृहत्वं समत्वं
च सप्तैतान्येकदण्डिनाम् ॥ ॥

ॐ अङ्गुष्ठाभ्यां नमः

ॐ तर्जनीभ्यां नमः

ॐ मध्यमाभ्यां नमः

ॐ अनामिकाभ्यां नमः

ॐ कनिष्ठिकाभ्यां नमः

ॐ करतलकरपृष्ठाभ्यां नमः

ॐ हृदयाय नमः

ॐ शिरसे स्वाहा

ॐ शिखायै वषट्

ॐ कवचाय हुं

ॐ नेत्रत्रयाय वौषट्

ॐ अस्त्राय फट्

[illegible]

[illegible]